শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীৱেঙ্কটেশ্ৱরনৱরত্নমালিকাস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীৱেঙ্কটেশ্ৱরনৱরত্নমালিকাস্তুতিঃ ॥

শ্রীমানম্ভোধিকন্যাৱিহরণভৱনীভূতৱক্ষঃপ্রদেশঃ
ভাস্ৱদ্ভোগীন্দ্রভূমীধরৱরশিখরপ্রান্তকেলীরসজ্ঞঃ।
শশ্ৱদ্ব্রহ্মেন্দ্রৱহ্নিপ্রমুখসুরৱরারাধ্যমানাঙ্ঘ্রিপদ্মঃ
পাযান্মাং ৱেঙ্কটেশ প্রণতজনমনঃকামনাকল্পশাখী॥ 1 ॥

যস্মিন্ ৱিশ্ৱং সমস্তং চরমচরমিদং দৃশ্যতে ৱৃদ্ধিমেতি
ভ্রশ্যন্ত্যন্তে চ তাদৃগ্ৱিভৱৱিলসিতস্সোঽযমানন্দমূর্তিঃ।
পদ্মাৱাসামুখাম্ভোরুহমদমধুৱিদ্ৱিভ্রমোন্নিদ্রচেতাঃ
শশ্ৱদ্ভূযাদ্ৱিনম্রাখিলমুনিনিৱহো ভূযসে শ্রেযসে মে॥ 2 ॥

ৱন্দে দেৱং মহান্তং দরহসিতলসদ্ৱক্ত্রচন্দ্রাভিরামং
নৱ্যোন্নিদ্রাৱদাতাম্বুজরুচিরৱিশালেক্ষণদ্ৱন্দ্ৱরম্যম্।
রাজন্মার্তাণ্ডতেজঃপ্রসিতশুভমহাকৌস্তুভোদ্ভাস্যুরস্কং
শান্তং শ্রীশঙ্খচক্রাদ্যমলকরযুতং ভৱ্যপীতাম্বরাঢ্যম্॥ 3 ॥

পাযাদ্ৱিশ্ৱস্য সাক্ষী প্রভুরখিলজগৎকারণং শাশ্ৱতোঽযং
পাদপ্রহ্ৱাঘরাশিপ্রশমননিভৃতাম্ভোধরপ্রাভৱো মাম্।
ৱ্যক্তাৱ্যক্তস্ৱরূপো দুরধিগমপদঃ প্রাক্তনীনাং চ ৱাচাং
ধ্যেযো যোগীন্দ্রচেতস্সরসিজনিযতানন্দদীক্ষাৱিহারঃ॥ 4 ॥

আদ্যং তেজোৱিশেষৈরুপগতদশদিঙ্মণ্ডলাভ্যন্তরালং
সূক্ষ্মং সূক্ষ্মাতিরিক্তং ভৱভযহরণং দিৱ্যভৱ্যস্ৱরূপম্।
লক্ষ্মীকান্তং খগেন্দ্রধ্ৱজমঘশমনং কামিতার্থৈকহেতুং
ৱন্দে গোৱিন্দমিন্দীৱরনৱজলদশ্যামলং চারুহাসম্॥ 5 ॥

রাকাচন্দ্রোপমাস্যং ললিতকুৱলযশ্যামমম্ভোজনেত্রং
ধ্যাযাম্যাজানুবাহুং হলনলিনগদাশার্ঙ্গরেখাঞ্চিতাঙ্ঘ্রিম্।
কারুণ্যাঞ্চৎকটাক্ষং কলশজলধিজাপীনৱক্ষোজকোশা -
শ্লেষাৱাপ্তাঙ্গরাগোচ্ছ্রযললিতনৱাঙ্কোরুৱক্ষস্স্থলাঢ্যম্॥ **6**॥

শ্রীমন্সম্পূর্ণশীতদ্যুতিহসনমুখং রম্যবিম্বাধরোষ্ঠং
গ্রীৱাপ্রালম্বিৱক্ষস্স্থলসততনটদ্বৈজযন্তীৱিলাসম্।
আদর্শৌপম্যগণ্ডপ্রতিফলিতলসৎকুণ্ডলশ্রোত্রযুগ্মং
স্তৌমি ৎৱাং দ্যোতমানোত্তমমণিরুচিরানল্পকোটীরকান্তম্॥ **7**॥

সপ্রেমৌৎসুক্যলক্ষ্মীদরহসিতমুখাম্ভোরুহামোদলুভ্যন্
মত্তদ্বৈরেফৱিক্রীডিতনিজহৃদযো দেৱদেৱো মুকুন্দঃ।
স্বস্তি শ্রীৱৎসৱক্ষাঃ শ্রিতজনশুভদঃ শাশ্ৱতং মে ৱিদধ্যাৎ
ন্যস্তপ্রত্যগ্রকস্তূর্যনুপমতিলকপ্রোল্লসৎফালভাগঃ॥ **8**॥

শ্রীমান্ শেষাদ্রিনাথো মুনিজনহৃদযাম্ভোজসদ্রাজহংসঃ
সেৱাসক্তামরেন্দ্রপ্রমুখসুরকিরীটার্চিতাত্মাঙ্ঘ্রিপীঠঃ।
লোকস্যালোকমাত্রাদ্বিহরতি রচযন্ যো দিৱারাত্রলীলাং
সোঽযং মাং ৱেঙ্কটেশপ্রভুরধিককৃপাৱারিধিঃ পাতু শশ্ৱৎ॥ **9**॥

শ্রীশেষশর্মাভিনৱোপক্লৃপ্তা
প্রিযেণ ভক্ত্যা চ সমর্পিতেযম্।
শ্রীৱেঙ্কটেশপ্রভুকণ্ঠভূষা
ৱিরাজতাং শ্রীনৱরত্নমালা॥ **10**॥

॥ ইতি শ্রীৱেঙ্কটেশ্ৱরনৱরত্নমালিকাস্তুতিঃ সমাপ্তা॥